## अध्याय :- ४८ chapter-48

नारद उवाच ।।[१]
अथातः[२] संप्रवक्ष्यामि सोमनाथमहिं[३] स्फुटम् स्फुटम् ।।
श्रृण्वन्या[४] कीर्तयिष्यामि पापमोक्षमवाप्नुयात् ।। १

पुरात्रेतायुगे पार्थ चौड देश समुद्भवौ ।।
ऊर्जयंतश्च प्रालेयौ विप्रावास्तां महाद्युती ।। २

तावेकदा पुराणार्थे श्लोक मेकम पश्यताम् ।।
तं दृष्ट्वा सर्वशास्त्रज्ञावास्तां कंटकितत्व चौ ।। ३

प्रभासाद्यानि तीर्थानि पुलस्त्यायाह पद्मभूः ।।
न यैस्तत्राप्लुतं चैव तैस्तीर्थमुपासितम् ।। ४

इति श्लोकं[५] पठित्वा तौ पुनः पुनरभिष्टुतम् ।।
तद्दैव च प्रभासाय निः सृतौ स्नातुमुत्तमौ ।। ५

तौ वनानि नदीश्चैव व्यतिक्रम्य शनैः शनैः ।।
महर्षिगणसंकीर्णा मुत्तीर्णौ नर्मदां शिवाम् ।। ६

गुप्तक्षेत्रस्य माहात्म्यं महीसागर संगमम् ।।
तत्र स्नात्वा प्रभासाय तन्मध्येन प्रतस्थतुः ।। ७

---

१ अ. श्री नारद ।। ब. श्री नारद उ० ।।
२ अ. अथात । ब. अथ ते ।
३ अ. सौमनाथ महं
४ अ. ब. श्रृणुयं
५ ब. श्लोक

ततो मार्गस्य शून्यत्वाच्चुट् क्षुधापीडितो भृशम् ।।
आस्तां विचेतनौ विप्रौ सिद्धलिंग समीपतः ।। ८

सिद्धनाथं नमस्कृत्य संप्रयातौ सुधैर्यतः ।।
क्षुधावेगेन तीव्रेण तृषा मध्याकर्तापितौ ।। ९

सहसा पतितौ भूमौ स्थूणपादौ विमूर्छितौ ।।
ततो मुहूर्तात्प्रालेय ऊर्जयंतमभाषत ।। १०

किंचिद्विश्वस्य धैर्याच्च सखे किं न श्रुतं त्वया ।।
यथा यथा विवर्णांगो नायते तीर्थयात्रया ।। ११

तथा तथा भवेदानेऽदीनः सोमेश्वरो हरः ।।
तथाऽऽस्तां लुंढमानौ[1] तावेवमुक्तेऽश्रुतेऽपि च ।। १२

लुंढमानौ जगामैव प्रालेयः किंचिदंतरे ।।
उत्थितं सहसा लिंगं भूमिं भित्वा सुदुर्दशम् ।। १३

खे वाणी चाभवतत्र पुष्पवर्षपुरः सरा ।।
प्रालेय तव हेतोस्तु सोमनाथ समं फलम् ।।
उत्थितं सागरतटे लिंगं तिष्ठात्र सुव्रत ।। १४

---

१ अ. लुढमानौ । ब. गूढमानौ

प्रालये [1]उवाच ।।

यद्येवं सत्यमेतच्च तथाप्यात्मा प्रकल्पितः[2] ।। १५

प्रभासाय प्रयातव्यं यदाऽमृत्योर्मया स्फुटम् ।।

ततः श्रीचैवोर्ज्जयंतोऽपि[3] मूर्छा भावाल्लुठन्पुरः ।। १६

अपश्यदुत्थितं लिंगं स च चैवं प्रत्यपद्यत ।।

ततः प्रत्यक्षतां प्राप्तो भवः श्रीचक्रे तयोर्द्विदे ।। १७

दृष्टया तनू ततो यातौ प्रभासं शिवसद्म च ।।

तावे तौ सोमनाथौ द्वौ सिद्धेश्वर समीपतः ।। १८

ऊर्जयंतः प्रतीच्यां च प्रालेयस्येश्वरोऽपरः ।।

~~सौम कुंडभसि पश्यैज्जन्मपापात्प्रमुच्यते ।।~~

सौम कुंडाभसि शनैः[4] स्नात्वार्णवमहीजले ।। १९

सौमनाथद्वयं पश्येज्जन्मपापात्प्रमुच्यते ।।

ब्रह्मात्र स्थापयित्वा तु हाटकेश्वर संज्ञितम् ।। २०

महीनगरके लिंगं पातालात्सुमनोहरम् ।।

तुष्टाव देवं[5] प्रयतः स्तुतिं तां श्रृणु पांडव ।। २१

नमस्ते भगवन्रुद्र[6] भास्करामित तेजसे ।।

नमो भवाय रुद्राय रसायां बुमयाय ते ।। २२

---

१ अ. प्रतौ उवाच नास्ति ।
२ ब. प्रकल्पिताः
३ ब. पुनः
४ ब. शने
५ ब. देव
६ अ. भगवान् रुद्र

शर्वाय क्षितिरूपाय सदा सुरभिणे नमः ।।
ईशाय वायवे तुभ्यं संस्पर्शाय नमो नमः ।। २३

पशूनां पतये चापि पावकायाति तेजसे ।।
भीमाय व्योमरूपाय शब्दमात्राय ते नमः ।। २४

महादेवाय सोमाय अमृताय नमोऽस्तु ते ।।
उग्राय यजमानाय नमस्ते कर्मयोगिने ।। २५

इत्येवं नामभिर्दिव्यैः स्तव एष उदीरितः[१]।।
यः पठेच्छृणुयाद्वापि पितामहकृतं स्तवम् ।। २६

हाटकेश्वर[२]लिंगस्य नित्यं च प्रयतो नरः ।।
अष्टमूर्तेः स सायुज्यं लभते नात्र संशयः ।। २७

हाटकेश्वर[३]लिंगं च प्रयतो यः स्मरेदपि ।।
तस्य स्याद्वरदो ब्रह्मा तेनेदं स्थापितं जय ।। २८

एवंविधानि तीर्थानि महीसागर संगमे ।।
बहून संति पुण्यानि संक्षेपाद्वर्णितानि मे ।। २९

*४ इति श्री स्कादि.... सोमनाथ वृतांत वर्णनं नाम अष्टचत्वारिंशोऽध्यायः।।४८।।

---

१ अ. उदीरितं २ अ. हटकेश्वर

३ अ. हटकेश्वर

*४ अ. इति श्री स्कंदपुराणे स्तंभतीर्थ माहात्म्यं ।।

ब. इति श्री स्कंदपुराणे कुमारिका खंड स्तंभतीर्थ महात्म्ये अष्टचत्वारिंशोऽध्यायः